कूटः, पुं, स्त्री, (कूट्यते दातुं न शक्यते स्थावरत्वादिति। कूट अप्रदाने + कर्म्मणि घञ्।) गृहम्। इति शब्दरत्नावली॥

कूटः, पुं, क्ली, (कूट् + घञ्।) निश्चलः। राशिः। (यथा, रामायणे। १। १४। १५।
"अभ्रकूटाश्च दृश्यन्ते बहवः पर्व्वतोपमाः"॥)
लौहमुद्गरः॥ (यथा, भागवते। ४। २५। ८।
"एते त्वां संप्रतीक्षन्ते स्मरन्तो वैशसं तव।
संपरेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः"॥)
माया। (यथा, महाभारते वनपर्व्वणि।
"नैव धर्म्मेण तद्राज्यं नार्ज्जवेन न चौजसा।
अक्षकूटमधिष्ठाय हृतं दुर्य्योधनेन वै"॥)
पर्व्वतशृङ्गम्। (यथा, महाभारते आनुशासनिके।
"अद्रीणामिव कूटानि धातुरक्तानि शेरते"॥)
तुच्छः। सीरावयवः। यन्त्रम्। फाँद इति भाषा। (यथा, रामायणे।
"वागुराभिश्च पाशैश्च कूटैश्च विविधैस्तथा"॥)
अनृतम्। इति मेदिनी॥ मृगबन्धयन्त्रः। इति हेमचन्द्रः॥ कैतवम्। इत्यमरः। ३। ३। ३६॥ (यथा, भागवते। ६। ५। १०।
"वाचः कूटन्तु देवर्षेः स्वयं विमम्शुर्धिया"॥
तद्वति त्रि। यथा, मनुः। ७। ९०।
"न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून्"॥
मिथ्याभूते त्रि। यथा, याज्ञवल्क्यः।
"त्रिगुणा वान्यथा ब्रूयुः कूटाःस्युः पूर्व्वसाक्षिणः"।
पुरद्वारम्। यथा, महाभारते। ४। ५। १४।
"इयं कूटे मनुष्येन्द्र! गहने महती शमी।
भीमशाखा दुरारोहा श्मशानस्य समीपतः"।
अत्र कूटशब्दस्तु टीकाकृन्मतभेदेन अर्थान्तरेऽपि वर्त्तते। अग्रभागमात्रम्। यथा, रामायणे।
"किरीटकूटैर्ज्ज्वलितं शृङ्गारं दीप्तकुण्डलम्"॥
भागवते च। ३। १३। २९।
"सवप्रकूटाङ्घ्रिनिपातवेग-
विशीर्णकुक्षिः स्तनयन्नुदन्वान्।
उत्सृष्टदीर्घोर्म्मिभुजैरिवार्त्त-
श्चुक्रोश यज्ञेश्वर! पाहि मेति"॥)

कूटकं, क्ली, (कूट् + संज्ञायां कन्।) फालम्। इत्यमरः। २। ९। १३॥

कूटकः, पुं, (कूट् + ण्वुल्।) कवरी। इति त्रिकाण्डशेषः॥ सुरागामगन्धद्रव्यम्। इति शब्दमाला॥ (पर्व्वतविशेषः। यथा, भागवते। ५। १९। १७।
"भारतेऽप्यस्मिन्वर्षे सरिच्छैलाः सन्ति बहवः"।
"त्रिकूट ऋषभः कूटकः कोल्लः सह्यः" इति॥)

कूटकृत्, पुं, (कूटं करोतीति। कूट + कृ + क्विप् तुगागमश्च।) शिवः। कायस्थः। इति त्रिकाण्डशेषः। कितवे, त्रि। (तुलाकर्म्मणि कैतवकारी। यथा, याज्ञवल्क्यः। २। २४३।
"तुलाशासनमानानां कूटकृन्नाणकस्य च"॥)

कूटजः, पुं, (कूटे पर्व्वते एव जायते। जन + डः।) कुटजवृक्षः। इति राजनिर्घण्टः॥ (कुटजशब्देऽस्य गुणादयो ज्ञेयाः॥)

कूटपूर्व्वं, पुं, हस्तिनां शिरोवज्वरः। इति त्रिकाण्डशेषः॥ कूटपर्व्वोऽपि क्वचित्पाठः॥

कूटपालकः, पुं, (कूटं स्तत्स्तोमं पालयतीति। पालि + ण्वुल्।) कुलालस्य पवनम्। कुमारेर पोयान् इति भाषा। पित्तज्वरः। इति हारावली॥

कूटयन्त्रं, क्ली, (कूटं कैतववत् यन्त्रम्।) आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते तत्। फाँद इति भाषा। तत्पर्य्यायः। उन्माथः २। इत्यमरः। २। १०। २६॥

कूटशाल्मलिः, पुं, (कूटः शाल्मलिः।) शाल्मलिविशेषः। काशिमाला इति ख्यातः। कुत्सितशाल्मलिः अन्तशाल्मलिर्वा। इत्यन्ये। इति भरतः॥ तत्पर्य्यायः। रोचनः २। इत्यमरः। २। ४। ४७॥ (क्वचित् स्त्रीलिङ्गेऽपि दृश्यते। कूटशाल्मलिरिव इति व्युत्पत्त्या यमस्य गदायाः गौणी संज्ञा। यथा, रघौ १२। ९५।
"अयःशङ्कुचितां रक्षः शतघ्नीमथ शत्रवे।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत्"॥
नरकस्थकण्टकाचितलौहशाल्मलिवृक्षविशेषः। स च दुरारोहः। यथा, महाभारते १८। ३। ४।
"नादृश्यन्त च तास्तत्र यातनाः पापकर्म्मिणाम्।
नदी वैतरणी चैव कूटशाल्मलिना सह"॥)
राजनिर्घण्टोक्तगुणपर्य्यायौ रोहितकशब्दे द्रष्टव्यौ॥

कूटसंक्रान्तिः, स्त्री, अर्द्धरात्रातीते सूर्य्यस्य राश्यन्तरगमनम्। यथा,—
"संक्रान्तिर्द्विविधा यत्र पूर्व्वं तत्र परित्यजेत्।
कर्त्तव्यं कूटसंक्रान्त्यां स्नानदानतपोव्रतम्॥
अर्द्धरात्रव्यतीते तु यदा संक्रमते रविः।
सा ज्ञेया कूटसंक्रान्तिर्मुनिभिः परिकीर्त्तिता"।
इति विद्यानिधिकृतज्योतिःसागरसारधृतं वचनम्॥ *॥ अपि च।
"अर्द्धरात्रे व्यतीते तु संक्रान्तिर्यदि भवेत्।
पूर्व्वे व्रतादिकं कुर्य्यात् परेद्युः स्नानदानयोः॥
इति भीमपराक्रमीयम्॥ स्नानदानयोरित्यत्र सप्तमीनिर्द्देशात् परदिवसीयस्नानदाननिमित्तकं पूर्व्वदिने उपवाससंयमरूपव्रतादिकं कुर्य्यादित्यर्थः। इति तिथ्यादितत्त्वम्॥

कूटस्थः, त्रि, (कूटे मायायां तिष्ठतीति। यद्वा, कूटवत् निर्व्विकारेण निश्चलः सन् तिष्ठतीति। कूट् + स्था + कः।) एकरूपतया यः कालव्यापी सः। इत्यमरः॥ (परमात्मा। यथा, पञ्चदश्यां ६। २२-२७।
"अधिष्ठानतया देहद्वयावच्छिन्नचेतनः।
कूटवन्निर्व्विकारेण स्थितः कूटस्थ उच्यते॥
कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिम्बकः।
प्राणानां धारणाज्जीवः संसारेण स युज्यते॥
जलव्योम्ना घटाकाशो यथा सर्व्वस्तिरोहितः।
तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते॥
अयं जीवो न कूटस्थं विविनक्ति कदाचन।
अनादिरविवेकोऽयं मूलाविद्येति गम्यताम्॥
विक्षेपावृतिरूपाभ्यां द्विधा ऽविद्या प्रकल्पिता।
न भाति नास्ति कूटस्थ इत्यापादनमावृतिः॥
अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते।
न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि"॥
कूटस्थचैतन्यस्य अविद्याध्यस्ततयैव जीवत्वं न तु स्वरूपतः नितरां तस्मादपि निरध्यस्तत्वात् निर्म्मलः सच्चिदानन्दस्वरूपावस्थः पुरुषोत्तमः परमात्मेत्युच्यते। यथा, गीतायां १५। १६-१७।
"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः"॥)
एकेनैव स्वभावेन निरवधिकालस्य व्यापको य आकाशादिः। इति भरतः॥ (कूटे भयावहे तिष्ठति यः। स्था + कः।) व्याघ्रनखः। इति राजनिर्घण्टः॥ (व्याघ्रनख इति भाषा॥)

कूटस्थं, क्ली, (कूटस्थ इव प्रकाशते यत्। अर्शआदेरच्।) व्याघ्रनखाख्यगन्धद्रव्यम्। इति जटाधरः॥

कूटसाक्षी, [न्] त्रि, (कूटः मायावी मिथ्यावादी कपटीत्यर्थः साक्षी।) मिथ्यासाक्षी इति व्यवहारतत्त्वम्॥ (याज्ञवल्क्ये कूटसाक्षिलक्षणम्। यथा,—
"द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः"॥
ते तु गुरुदण्डार्हाः। अकृतप्रायश्चित्ताः रौरवाख्यनरकं व्रजेयुः॥ यो हि जानन्नपि साक्ष्यं न ददाति स कूटसाक्षितुल्यः। तथा च तत्रैव।
"न ददाति तु यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि"॥)

कूटागारं, क्ली, (कूटं आगारं गृहम्।) वड़भी। तत्पर्य्यायः। चन्द्रशालिका २। इति त्रिकाण्डशेषः॥ स्त्रीणां क्रीड़ागारम्। इत्यादिकाण्डटीका॥

कूटार्थभाषिता, स्त्री, (कूटार्थस्य दुर्भेद्यार्थस्य कल्पितार्थस्य वा या भाषिता।) प्रबन्धकल्पनाकथा। इति शब्दरत्नावली॥ रूपकथा इति भाषा॥

कूड़, शि घान्ये। भक्षे। इति कविकल्पद्रुमः। (तुदां-परं-अकं-सकं-सेट्।) मञ्जरी। फलाभावेऽप्यस्य कूटादौ पाठः प्राचामनुरोधात्। प्राच्योऽपि ढान्तप्रस्तावादिमं कूटादौ पठितवन्तः। शि, कूड़ती कूड़न्ती। घान्यं घनीभावः। कूड़ति दुग्धं वह्नियोगात्। कूड़त्यन्नं लोकः। इति दुर्गादासः॥

कूड्यं, क्ली, (कूड़ति घनीभवति मृदादिना। कूड़ + ण्यत्।) भित्तिः। इति शब्दरत्नावली॥ देयाल इति भाषा॥

कूण, त् क सङ्कोचे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-अकं-सेट्।) दीर्घी मूर्द्धन्योपधः अचुकूणच्चक्षुः सङ्कुचितमभूदित्यर्थः। इति दुर्गादासः॥

कूण, क ङ सङ्कुचि। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-अकं-सेट्।) मञ्जरी। क ङ, कूणयते चक्षुः सङ्कुचितं स्यादित्यर्थः। पद्यमञ्जरीत्येके। इति दुर्गादासः॥

कूणिः, त्रि, (कूणति कुणितो भवति रोगादिभिरिति शेषः। कूण सङ्कोचे "सर्व्वधातुभ्य इन्"। उणां ४। ११७। इति इन्।) कूणिः। रोगादिना